**स्थापन** न॰ स्था–णिच्–पुक् ल्युट्। १आरोपणे २पुंसवनाख्ये गर्भसंस्कारे च मेदि॰। ३समाधौ। युच्। स्थापनाप्यत्र स्त्री सा च निवेशने वादे भावपक्षस्य प्रमाणादिना व्यवस्थापने च। [ङीप्। पाठायाम् अमरः।

**स्थापनी** स्त्री स्थाप्यतेऽनया स्था–णिच्–पुक् करणे ल्युट्

**स्थापित** त्रि॰ स्था–णिच्–पुक् क्त। १निश्चिते २निवेशिते ३न्यस्ते च मेदि॰।

**स्थामन्** न॰ स्था–मनिन्। १सामर्थ्ये अमरः २बले च।

**स्थायिन्** त्रि॰ स्था–णिनि। १स्थितिशीले अलङ्कारोक्ते रसानुकूले रत्यादिभावे पु॰। "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा। रसतामेति रत्यादिः स्थायी भावः सचेतसाम्" "अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः"। "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेत्यमष्टौ प्रोक्ताः शमोऽपि च" सा॰द॰। एते च क्रमेण शृङ्गारादीनां स्थायिभावाः। [अमरः।

**स्थायुक** त्रि॰ स्था–उकञ्। १स्थितिशीले २एकग्रामाधिकृते पु॰

**स्थाल** न॰ स्थलति तिष्ठत्यन्नाद्यत्र आधारे घञ्। (थाल) १अन्नपात्रभेदे। २पाकपात्रे (हाँड़ि) स्त्री अमरः गौरा॰ ङीष्।

**स्थालीपाक** पु॰ स्थाल्यां पाकः। गव्यदुग्धेन स्थाल्यां कृते १पाकभेदे। स्थाल्यां पच्यतेऽसौ पच–कर्मणि घञ् २चरौ तत्पाकप्रकारः चरुशब्दे दिङ्मात्रमुक्तः गोभिलोक्तप्रकारः सं॰त॰ दर्शितो यथा

तत्र गोभिलः "अथोदूखलमुषले प्रक्षाल्य शूर्पञ्च पश्चादग्नेः प्रागग्रान् कुशानास्तीर्य्य उपसादयति अथ हविर्निर्वपेदिति। व्रीहीन् यवान् वा कांस्येन चरुस्थाल्या वा अमुष्मै त्वा जुष्टं निर्वपामीति देवतानामोद्देशः सकृद्यजुषा द्विस्तूष्णीम् अथ पश्चादवहन्तुमुपक्रमते दक्षिणोत्तराभ्यां पाणिभ्यां त्रिःफलीकृतांस्तण्डुलां स्त्रिर्देवताभ्यः प्रक्षालयेत् द्विर्मनुष्येभ्यः सकृत् पितृभ्य इति। "पवित्रान्तर्हितांस्तण्डुलानावपेत् कुशलशृतमिव स्थालीपाकं स्थापयेत् प्रदक्षिणमुदायुवन् शृतमभिघार्य्य उदगुद्वास्य प्रत्यभिघारयेदिति" सू॰। अस्यार्थः उपसादयति स्थापयति देवतानामोद्देशं देवतानामोच्चारणं यथा आत्तया अमुष्मै त्वा जुष्टं निर्वपामीत्यनेन उदूखलोपरि व्रीह्यादीन् कांस्यादिना सकृन्निर्वपेत्। अत्रामुष्मा इत्यत्र चतुर्थ्यन्तनामोच्चारणम्। अतएव कात्यायनः "अमुष्मायिति नाम गृह्णाति"। नारायणीयेऽपि "अदः पदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते। साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत्"। अतोऽदः पद एव नामोहो न तु विष्णुपाजपादाविदमित्यादौ। एवञ्चाग्नये त्वा जुष्टं निर्वपामीति सामगानाम् यजुःप्रयोगो गोभिले निर्वापमात्रस्मृतेः यजुर्वेदिकसमन्त्रकग्रहणप्रोक्षणे सामगेन न कार्य्ये। यजुःपरिभाषामाह जैमिनिः "शेषे यजुःशब्दः इति। शेषे सामभिन्ने मन्त्रजाते। ततश्च यन्मन्त्रजातं प्रश्लिष्टपठितं गानपादभेदरहितं तद्यजुरिति। बहुदैवत्ये च बहुदेवतानामभिः प्रत्येकं निर्वापः। अतनिर्वापो मन्त्रेणैव होमोऽपि पृथक्। निर्वापपरिमाणन्तु होमसंख्याविशेषस्थित्यनुसारेणेत्याह छन्दोगपरिशिष्टम् "देवतासंख्यया गृह्य निर्वापांश्च पृथक् पृथक्। तूष्णीं द्विरेव गृह्णीयाद्धोमस्यापि पृथक् पृथक्। यावता होमनिर्वृत्तिर्भवेद्वा यत्र कीर्त्तिता। शेषञ्चैव भवेत् किञ्चित्तावन्तं निर्वपेच्चरुम्"। यद्यपि देवतासंख्ययेति वचनं चरुसमशनीययोः इत्युपक्रम्य पठितं तथाप्याकाङ्क्षायालाघवेन चरुसामान्यपरमिति। चरुविधौ तु विद्याकरवाजपेयी "यत्र प्रयोजनाभावनिश्चयस्तत्रैव तदुपादानादिलोपः। यत्रानुष्ठानवेलायामेव पुरुषदोषेण प्रयोजनाभावो ज्ञायते तदा प्राक् तन्निश्चयात् शास्त्रप्रापितः पदार्थो नियमापूर्वमात्रार्थमनुष्ठेय" इति। अतएव यदा त्वालस्यादिना व्रीह्यादिस्थाने तण्डुला गृहीताः तदापि अवघातादि समाचरन्ति याज्ञिकाः पठन्ति च। "घाते न्यूने तथा छिन्ने सान्नाय्ये मान्त्रिके तथा। यत्र मन्त्राः प्रयोक्तव्या मन्त्रायत्तार्थसाधकाः"। मान्त्रिके मन्त्रसाध्ये अवघातादौ। न्यूने तत्काले मन्त्रपाठाभावेऽपि यज्ञकाले मन्त्राः पाठ्याः। अर्थांस्तु मन्त्रार्थज्ञानस्य नास्त्युपयोगः। चरुस्थालीयपरिमाणमाह छन्दोगपरिशिष्टम्। "तिर्य्यगूर्द्ध्वं समिन्मात्रा दृढा नातिबृहन्मुखी। मृण्मय्यौडुम्बरी वापि चरुस्थाली प्रशस्यते"। गर्भप्रस्तार दीर्घाभ्यां प्रादेशप्रमाणा चरुस्थाली औडुम्बरी ताम्रमती एषा पायसचरावपि न निषिद्धा "पयोलुक्तसारञ्च ताम्रपात्रे न दुष्यति" स्मृतिसागरधृतवचनाच्च। अतएव शारदातिलके "ततश्च संस्कृते वह्नौ गोक्षीरेण चरुं पचेत्। मन्त्रेण क्षालिते पात्रे नवे ताम्रमयादिके"। दक्षिणोत्तराभ्यामिति दक्षिण उत्तर उपरि ययोः पाणयोस्ताभ्यां सुमलं गृहीत्वा इति शेषः। त्रिःफलीकृतान्